# सङ्कलनात्मकमूल्याङ्कनम्-II, 2013
## संस्कृतम्

अवधि : होरात्रयम् | 020913 | पूर्णाङ्कः - नवतिः

**निर्देशाः –**
(1) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः क, ख, ग, घ ।
(2) सर्वे प्रश्नाः अनिवार्याः सन्ति ।
(3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमणैव लेखनीयानि ।
(4) उत्तराणि संस्कतेन एव लेखनीयानि ।

## खण्डः 'क' (अपठितावबोधनम् – 10 अंकाः)

**प्र.1 अधोलिखितं अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -**

**अनुच्छेद :**

ग्रामस्य समीपे पर्वतस्य उपरि एकं मनोहरं मन्दिरं आसीत् । मन्दिरपर्यन्तं मार्गः बहुक्लिष्टः आसीत्। 'रमन' इति नाम्नः बालकः निश्चयं कृतवान् यत् श्वः उषाकाले मन्दिरं गमिष्यति । द्वितीये दिने सः हस्ते दीपं गृहीत्वा गृहात् बहिः गतवान् । सः दीपेन शिखरं द्रष्टुं प्रयत्नं कृतवान् । किन्तु मन्दिरस्य शिखरं न दृश्यते स्म । अतः रमनः कष्टम् अनुभूय तत्र एकस्मिन् शिलाखण्डे एव उपविष्टः । अनन्तरं एकः वृद्धोऽपि हस्ते दीपं धृत्वा तेन मार्गेण गच्छति स्म । सूर्योदयानन्तरं सः वृद्धः तेनैव मार्गेण प्रत्यागच्छन् आसीत् । रमनः तं वृद्धं पृष्टवान् 'भवान् तु मन्दिरस्य शिखरं न दृष्टवान् किन्तु भवान् तत्र कथं गत्वा प्रत्यागतः' इति । तदा वृद्धः अवदत् 'दीपेन अहम् एकमेकं पदं गन्तु प्रकाशं लब्धवान् तथैव एकमेकं पादम् अग्रे स्थापयित्वा अहं मन्दिरपर्यन्तं गतवान्' इति ।

**I. एकपदेन उत्तरत -** **(½×4=2)**

क) मन्दिरपर्यन्तं मार्गः कीदृशः आसीत् ?
ख) रमनः कुत्र उपविष्टः ?
ग) मनोहरं मन्दिरं कस्य उपरि आसीत् ?
घ) वृद्धः कदा तेनैव मार्गेण प्रत्यागच्छत् ?

**II. पूर्णवाक्येन उत्तरत -** **(1×2=2)**

क) बालकः किं निश्चयं कृतवान् ?
ख) वृद्धः कथं प्रकाशं लब्धवान् ?

**III. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत ।** **(2×1=2)**

**IV. भाषिककार्यम् -** **(1×4=4)**

क) 'उपविष्टः' इति क्रियापदस्य किं कर्तृपदम् ?
अ) कष्टम् ब) रमनः
स) शिलाखण्डः द) तत्र

ख) 'लब्धवान्' अत्र कः प्रत्ययः प्रयुक्तः ?
अ) क्त ब) क्तवतु
स) मतुप् द) शानच्

ग) 'मनोहरं मन्दिरं' अत्र किं विशेष्यपदम् ?

घ) 'दर्शनाय' इत्यर्थे किं पदं प्रयुक्तम् ?
अ) दृष्टवान् ब) द्रष्टुम्
स) पृष्टवान् द) गन्तुम्

## खण्डः 'ख' (रचनात्मकं कार्यम् – 15 अंकाः)

**पत्रलेखनम् -** **(½×10=5)**

**प्र.2 भवान् हिसार नगरस्य वास्तव्यः सोमनाथः । भवतः मित्रम् आनन्दः दिल्ली नगरे वसति । तं परीक्षायाम् सफलतायै वर्धापनपत्रं मंजूषायाः सहायतया लिखत -**

JSUNIL TUTORIAL

मञ्जूषा - **सोमनाथः, अपश्यम्, महती, आगतः, छात्रवृत्तिम्, तुभ्यम्, आनंदः, अभिन्नहृदयं, तत्रास्तु, हिसार-नगरतः**

(1)...............

दिनांकः 02.03.2013

प्रिय मित्र !

(2)............... ।

अत्र कुशलं (3)............... ।

अद्यैव तव परिणामः (4)............... । तव सफलताम् ज्ञात्वा मम मनसि (5)............... प्रसन्नता जाता । मम एषा प्रसन्नता अधिकतरा जाता यदा अहम् तव नाम योग्यता सूचौ (6)............... । त्वया सप्त-शतानि अंकाः प्राप्ताः । त्वं निश्चित-रूपेण (7)............... प्राप्स्यसि । त्वया परिवारस्य विद्यालयस्य च नाम उज्ज्वलीकृतम् ।

अस्याम् उज्ज्वल सफलतायाम् अहम् (8)............... हार्दिकं वर्धापनम् यच्छामि उज्ज्वल-भविष्याय च कामये । मातृपितृचरणेषु प्रणामाः ।


तव (9)............... मित्रम्

(10)...............

**चित्रवर्णनम् -**

**प्र.3 अधोप्रदत्तं चित्रं मञ्जूषायाः सहायतया पञ्चवाक्येषु वर्णयत -** **(2×5=10)**

**मञ्जूषा-** द्विचक्रिका, त्रिचक्रिका, बसयानानि, कारचालकः, जनाः, विवादम्, एतत् चित्रम्, राजमार्गः, वाहनानि, अनेके, भवनानि, सन्ति, अनेके वृक्षाः, बसचालकः, नगरम्



**अथवा**

**अनुच्छेदलेखनम् -**

**मञ्जूषायां प्रदत्तशब्दानां सहायतया 'स्वच्छता' इति विषयम् अधिकृत्य पञ्चसंस्कृतवाक्यानि लिखत ।**

**मञ्जूषा-** **इतस्ततः, अवकरपात्रेषु, मार्गेषु, अवकरं, स्वच्छतायाः, क्षेपणीयम्, आवरणानि**

## खण्डः 'ग' (अनुप्रयुक्तव्याकरणम् – 30 अंकाः)

**प्र.4 क) रेखांकितपदस्य का विभक्तिः ?** **(½×4=2)**

अ) <u>भवता</u> किं न कृतं राजत्राणाय ।

(i) सप्तमी (ii) प्रथमा

(iii) द्वितीया (iv) तृतीया

ब) <u>भवताम्</u> राजसभा आत्मतत्त्वज्ञैः अलंकृता अस्ति ।

(i) प्रथमा (ii) षष्ठी

(iii) सप्तमी (iv) तृतीया

JSUNIL TUTORIAL

स)　जनकस्य सभा <u>विद्वद्भिः</u> अलंकृता आसीत् ।

(i) प्रथमा　(ii) चतुर्थी

(iii) तृतीया　(iv) पञ्चमी

द)　अहं <u>गच्छन्तं</u> बालकं पृच्छामि ।

(i) तृतीया　(ii) द्वितीया

(iii) षष्ठी　(iv) सप्तमी

**ख)　अधोलिखितवाक्ये रिक्तस्थाने किं पदं भविष्यति ?** **(½×8=4)**

(i) ............ पुत्रः एव राजपुत्रः भवति ।

अ) राज्ञः　ब) राज्ञाम्

स) राजानम्　द) राजा

(ii) वदन्तु ............ किं सत्यवचनं सर्वोपरि अस्ति ?

अ) भवान्　ब) भवन्तौ

स) भवन्तः　द) भवन्तम्

(iii) ............ मोदकानि रोचन्ते ।

अ) मम　ब) माम्

स) मह्यम्　द) मयि

(iv) ............ बालकाः सन्ति ।

अ) गच्छत्　ब) गच्छन्

स) गच्छन्तः　द) गच्छन्तम्

(v) ............ मनः तु मम अधीनम् ।

अ) भवान्　ब) भवतः

स) भवन्तम्　द) भवता

(vi) भवादृशाः ............ मम पण्डितपरिषदं विभूषयेयुः ।

अ) विद्वांन　ब) विदुषा

स) विदुषे　द) विद्वांसः

(vii) ............ तन्तुवायाय स्वर्णमुद्राः अर्पयति ।

अ) राज्ञा　ब) राजा

स) राज्ञः　द) राजन्

(viii) ............ प्रतिकूलानि परेषां न समाचरेत् ।

अ) आत्मन्　ब) आत्मनः

स) आत्मा　द) आत्मनम्

**प्र.5　(i)　रेखांकितपदस्य का विभक्तिः किं च वचनम् ?** **(1×2=2)**

क)　अत्र <u>तिस्रः</u> कन्याः गीतं गायन्ति ।

अ) प्रथमा, एकवचनम्　ब) प्रथमा, बहुवचनम्

स) द्वितीया, द्विवचनम्　द) द्वितीया, एकवचनम्

ख)　<u>चत्वारः</u> बालकाः सन्ति ।

अ) प्रथमा, एकवचनम्　ब) प्रथमा, बहुवचनम्

स) द्वितीया, एकवचनम्　द) तृतीया, एकवचनम्

**(ii)　कोष्ठके प्रदत्तशब्दे उचितविभक्तिं प्रयुज्य वाक्यपूर्तिं क्रियताम्**

क)　भारतवर्षे .................. रत्नानि कथ्यन्ते । (त्रि)

ख)　हस्ते .................. अंगुल्यः भवन्ति । (पञ्च)

ग)　अस्माकं विद्यालयात् बहिः .................. वृक्षाः आसन् । (चतुर्) **(½×4=2)**

घ)　मम .................. हस्तौ स्तः । (द्वि)

SUNIL TUTORIAL

**(iii) अधोलिखितवाक्ये रिक्तस्थाने किं पदं भविष्यति ?** **(½×4=2)**

क) मम समीपे .................... गृहाणि सन्ति ।

अ) चतुराः  ब) चतस्रः

स) चत्वारि  द) चत्वारः

ख) सुनीता .................... बालिकासु प्रथमं स्थानं प्राप्तवती ।

अ) पञ्च  ब) पञ्चभ्यः

स) पञ्चसु  द) पञ्चानाम्

ग) सर्वे जनाः .................... बसयानैः भ्रमणाय अगच्छन् ।

अ) त्रीणी  ब) त्रिभिः

स) त्रयः  द) तिस्रः

घ) कक्षायाम् .................... बालिकाः सन्ति ।

अ) चतस्रः  ब) चत्वारः

स) चत्वारि  द) चतुर्भ्यः

**प्र.6 (i) अधोलिखितवाक्येषु कोष्ठके प्रदत्तधातूनां लोट्लकारे क्रियापदानां किं समुचितं पदं भविष्यति ?** **(1×3=3)**

क) यूयं गृहकार्यम् .................. । (कृ)

अ) कुरुत  ब) कुरु  स) कुर्यात्

ख) सः नवरत्नानाम् नामानि .................. । (वद्)

अ) वदतु  ब) वदत  स) वदताम्

ग) ते राज्यं .................. । (पाल्)

अ) पालयन्तु  ब) पालयेयुः  स) पालयन्ति

**(ii) अधोलिखितवाक्येषु कोष्ठके प्रदत्तधातूनां विधिलिङ् क्रियापदानां किं समुचितं पदं भविष्यति ?** **(1×3=3)**

क) कालः तस्य रसम् .................. । (पा)

अ) पिबतु  ब) पिबेत्  स) पिबेः  द) पिबेयुः

ख) आवाम् किम् .................. ? (कृ)

अ) कुर्याम्  ब) कुर्याव  स) कुर्येव  द) कुर्युः

ग) ते बालकाः असत्यं न .................. । । (वद्)

अ) वदेत्  ब) वदेयुः  स) वदेत  द) वदेव

**प्र.7 (i) अधोलिखितवाक्येषु रिक्तस्थानानि समुचितपदैः पूरयत -** **(1×3=3)**

क) रामः ..................अलम् । (रावण)

अ) रावणाय  ब) रावणेन  स) रावणात्  द) रावणम्

ख) .................. सह आपणं गच्छामि । (जननी)

अ) जनन्या  ब) जननीम्  स) जनन्याः  द) जनन्यै

ग) .................. निराकारः उच्यते । (आत्मन्)

अ) आत्मनः  ब) आत्मा  स) आत्मन्  द) आत्मनम्

**(ii) अधोलिखितेषु अनुच्छेदे मञ्जूषायां प्रदत्तशब्दैः रिक्तस्थानानि पूरयत -** **(½×6=3)**

(1)............ आश्रमे अनेके (2)............ भवन्ति । तत्र अनेके वटवः अपि सन्ति ते परस्परं (3)............ इव आचरन्ति । ते प्रातः काले (4)............ अर्घ्यं यच्छन्ति हवनं कुर्वन्ति तत्पश्चात् (5)............ संलग्नाः भवन्ति । (6)............ परितः गहन-वनम् अस्ति ।

**मञ्जूषा -** **सूर्याय, बन्धवः, जन्तवः, मुनेः, स्वाध्याये, आश्रमम्**

JSUNIL TUTORIAL

प्र.8 (i) **धातु + क्त / क्तवतु प्रत्यययोगेन निर्मितम् उचितं पदं चित्वा लिखत -** (1×3=3)

क) रामः वनं ...............।

अ) गतवती ब) गतवान् स) गतवत् द) गतवन्तः

ख) पत्रं लिखन् बालकः ............... ।

अ) हसितवत् ब) हसितम् स) हसितवान् द) हसितः

ग) मया भोजनं ............... ।

अ) पचितुम् ब) पक्वम् स) पक्त्वा द) पक्ववान्

(ii) **निर्दिष्टधातुप्रत्यययोगेन रूपेण वाक्यपूर्ति कुरुत -** (1×3=3)

क) .............. बालकः पुस्तकमपि पठति । (खाद् + शतृ)

ख) सैनिकः देशम् .............. । (रक्ष् + क्तवतु)

ग) .............. रमा गृहम् अगच्छत् । (पठ् + शतृ)

## खण्डः 'घ' (पठितांश–अवबोधनम् – 35 अंकाः)

प्र.9 **अधोलिखितं गद्यांशं पद्यांशं नाट्यांशं च पठित्वा प्रदत्त प्रश्नानामुत्तराणि लिखत -**

(i) **गद्यांश -**

एकदा स्वातिनामकः मुनिः पिपासया पीडितोऽभवत् । जलमूलम् अन्विष्यता तेन कश्चन आह्लादकरः शब्दः श्रुतः । तम् अनुसृत्य स अग्रे गतः । तत्र कुत्रचित् पर्वतात् पतन्तः जलबिन्दवः शुष्कपर्णानाम् उपरि पतित्वा मधुरं संगीतं जनयन्ति स्म । एतद् अवगत्य प्रेरितः स तृषाकुलतां विस्मृत्य वेगेन आश्रमम् आगतवान् । संगीतसाधनेषु प्रतिध्वनेः उत्पादनार्थं यः सूक्ष्मक्रमः आवश्यकः तम् अन्विष्टवान् सः । एवं यत् संगीत-साधनम् निर्मितवान् तस्य नाम मृदङ्ग इति ।

I. **एकपदेन उत्तरत -** (½×2=1)

क) मुनिः कया पीडितः अभवत् ?

अ) पिपासया ब) अन्विष्यता स) निद्रया

ख) जलमूलम् अन्विष्यता केन आह्लादकरः शब्दः श्रुतः ?

अ) मुनेन ब) मुनिना स) मुनिः

II. **पूर्णवाक्येन उत्तरत -** (2)

मुनिः किं विस्मृत्य आश्रमम् आगतवान् ?

III. **भाषिककार्यम् -** (1×2=2)

क) 'पिपासा' इति पदस्य अर्थम् अनुच्छेदात् चित्वा लिखत -

अ) मृषा ब) तृषा स) जलबिन्दवः

ख) 'मधुरं संगीतम्' अनयोः पदयोः विशेष्यपदम् किम् ?

अ) संगीतम् ब) मधुरं स) मधुरा

(ii) **पद्यांश -**

छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ।।

I. **एकपदेन उत्तरत -** (½×2=1)

क) सत्पुरुषाः इव के सन्ति ?

अ) उद्याने ब) वृक्षाः स) सत्पुरुषाः

ख) वृक्षाः छायाम् कस्य कुर्वन्ति ?

अ) स्वयमस्य ब) फलस्य स) अन्यस्य

SUNIL TUTORIAL

**II. पूर्णवाक्येन उत्तरत -** **(2)**

वृक्षाः परार्थाय किं किं कुर्वन्ति ?

**III. भाषिककार्यम् -** **(1×2=2)**

अ) 'कुर्वन्ति' इत्यस्य पदस्य कर्तृपदं किम् ?

अ) पुरुषाः

ब) वृक्षाः

स) छाया

ख) 'फलान्यपि' अस्य सन्धिच्छेदं अस्ति ।

अ) फल + अन्यपि

ब) फला + न्यापि

स) फलानि + अपि

**(iii) नाट्यांश -**

**(भामाशाहः धनराशिमादाय आयाति)**

भामाशाहः - (सप्रणामम्) अन्नदातः ! सेवकं परित्यज्य कुत्र प्रस्थितो भवान् ?

प्रतापः - (दीर्घं निःश्वस्य) न क्वापि बन्धो ! गन्तुमपि न शक्यते । धनसेनयोः अभावे देशरक्षणाय पर्याकुलाः स्मः ।

भामाशाहः - भवतः चिन्तातुरतां परिज्ञाय भग्नमिव मे हृदयम् । (धनराशिं निर्दिश्य) इयं सम्पतिः खलु कस्मै प्रयोजनाय ? ईदृशे एव कर्मणि अस्याः उपयोगः श्रेयान् ।

प्रतापः - सत्यं वदति भवान् ।

भामाशाहः - यद्येवं तर्हि गृह्यताम् । त्रोट्यन्तां पारतन्त्र्यशृङ्खलाः स्वकीयैः लौहबाहुभिः । स्वतन्त्रः क्रियतां स्वदेशः ।

**I. एकपदेन उत्तरत -** **(½×2=1)**

क) धनराशिमादाय कः आगच्छति ?

अ) भिल्लः ब) भामाशाहः

स) प्रतापः द) सैनिकः

ख) कयोः अभावे प्रतापः पर्याकुलः अस्ति ?

अ) देशभक्तयोः ब) स्वामिसैनिकयोः

स) धनसेनयोः द) शस्त्रसेनयोः

**II. पूर्णवाक्येन उत्तरत -** **(2)**

भामाशाहः किमर्थं धनराशिम् अर्पितवान् ?

**III. भाषिककार्यम् -** **(1×2=2)**

क) 'ईदृशे एव कर्मणि अस्याः उपयोगः' । अत्र 'अस्याः' प्रयोगं कस्मै अभवत् ?

अ) देशाय ब) चिन्तायै स) 'सम्पत्ति' इति पदाय

ख) 'स्वकीयैः लौहबाहुभिः' अत्र 'स्वकीयैः' पदे का विभक्तिः ?

अ) सप्तमी ब) चतुर्थी स) तृतीया

**प्र.10 अधोलिखितश्लोकयोः अन्वययोः रिक्तस्थानपूर्तिम् कुरुत -**

**क)** आम्र ! यद्यपि गता दिवसास्ते पुष्पसौरभफलप्रचुरा ये । **(½×5=2½)**

हन्त ! सम्प्रति तथापि जनानां छाययैव दलयस्यतितापम् ।।

**अन्वयः** - आम्र ! (1)………… ते दिवसाः (2)………… ये पुष्पसौरभफल प्रचुराः (भवन्ति स्म), हन्त ! (3)……….. सम्प्रति छायया (4)……….. जनानाम् अतितापं । (5)………… ।

JSUNIL TUTORIAL

ख) स्नेहं ददाति यो मह्यं नित्यं तस्मै ददाम्यहम् । (½×5=2½)

ज्योतिः पदार्थज्ञानार्थं कोऽहं वदतु साम्प्रतम् ।।

**अन्वयः** - यः मह्यं (1)............. ददाति, (2)............. तस्मै नित्यं पदार्थ-ज्ञानार्थं (3)............. ददामि (4)............. वदतु अहम् (5)............. ?

**मञ्जूषा** -

| तथापि, दलयसि, अहम् साम्प्रतम्, गताः, एव, स्नेहं, यद्यपि, कः, ज्योतिः |
|---|

**प्र.11 रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत -** **(1×5=5)**

क) वृक्षस्य उपरि बलाका आसीत् ।

ख) अहं दंतैः हीनः शिलाभक्षी ।

ग) महीरुहेभ्यः अर्थिनः निराशाः न यान्ति ।

घ) वृक्षायुर्वेद महर्षिपराशरेण विरचितः ।

ङ) मात्रा अनुज्ञातः स राजसभां गतः ।

**प्र.12 निम्नलिखितवाक्यानि घटनाक्रमानुसारं पुनः लिखत -** **(½×10=5)**

क) हे राजन् ! किं वक्रे देहे आत्माऽपि वक्रः भवति ?

ख) जनकः अपृच्छत् - भो अष्टावक्र ! किमर्थं हससि ?

ग) अष्टावक्रः मातरम् अपृच्छत् - मातः ! क्व आस्ते मे पिता ?

घ) मात्रा अनुमतः अष्टावक्रः राजसभां गतः ।

ङ) अष्टावक्रः पण्डितानां चेष्टितं दृष्ट्वा उच्चैः अहसत् ।

च) पण्डिताः तं वक्रदेहं बालं दृष्ट्वा हसितुम् प्रारभन्त ।

छ) अष्टावक्रस्य शास्त्रपाण्डित्येन सर्वे प्रभाविताः जाताः ।

ज) जनकः स्वमनः अष्टावक्राय यच्छति ।

झ) जनकः प्रभावितः सन् अष्टावक्राय किमपि दातुम् इच्छति ।

ञ) जनकः पराजितः भूत्वा अष्टावक्रस्य पादयोः पतति ।

**प्र.13 अधोलिखितपंक्तिषु रेखांकितपदानां प्रसंगानुसारं शुद्धं अर्थं चित्वा लिखत -** **(1×5=5)**

क) स्नेहं ददाति यो मह्यं नित्यं तस्मै ददाम्यहम् ।

अ) तैलम् ब) सम्मानम्

स) धनम् द) प्रेमम्

ख) एतत् प्रजायाः सकाशाद् आगतम् ।

अ) क्रोशात् ब) दूरात्

स) समीपात् द) स्थानात्

ग) भारताय मे अखिलं चेष्टितम् अर्पितम् ।

अ) न्यूनम् ब) अतिरिक्तं

स) अधिकं द) सम्पूर्णम्

घ) नृत्यामि नित्यं धवलास्तरेषु ।

अ) धवलप्रस्तरेषु ब) श्वेतकर्गदेषु

स) श्वेतशय्यासु द) कृष्णास्तरेषु

ङ) सा साध्वी भर्तुः सुश्रूषां कृत्वा मुनेः अन्तिकम् आगता ।

अ) सेवाम् ब) वार्ताम्

स) कथनम् द) श्रोतुम्

JSUNIL TUTORIAL